भावे असुन् । २द्वेषे ३अप्रीतौ च पु० । "द्वेषोयुतो न दुरिता" ऋ०५।०११६। द्वेषोयुतः अप्रीतियुतः भा० ।

**द्वेष्य** त्रि० द्विष–कर्मणि यत् कर्मणि ण्यत् वा । १द्वेषविषये २द्वेषार्हे च । "द्वेष्योऽपि सम्मतः शिष्टस्तस्यार्त्तस्य यथौषधम्" रघुः । "यथा यमः प्रियद्वेष्यौ प्राप्ते काले नियच्छति" मनुः । स्वकृतापकारमपेक्ष्यापकारकर्त्तरि असहने श्वलौ च ।

**द्वै** अ० द्व–बा० डै । वितर्के चादिगणः ।

**द्वैगुणिक** त्रि० द्विगुणार्थं द्विगुणं "तद् प्रयच्छति गर्ह्यम्" पा ठक् । द्विगुणलाभाय धनप्रयोक्तरि वृद्ध्याजीवे वार्द्धुषौ ।

**द्वैत** न० द्विधा इतं द्वीतं तस्य भावः स्वार्थे वा अण् । द्वैधीभावे २द्वन्द्वे युगले च । द्वैताद्वैतयोरुभयोरपि सप्रमाणकत्वात् न्यायादिमते द्वैतम् वेदान्तिमते अद्वैतं रामानुजमते विशिष्टाद्वैतमित्येव स्थितम् । अन्ये शुद्धाद्वैतमिच्छन्ति । तत्राचार्य्या एवमाहुः । "अद्वैतमेव सत्यं तस्मिन् द्वैतं न सत्यमध्यस्तम् । रजतमिव शुक्तिकायां मृगतृष्णायामिवोदकस्फुरणम् । आरोपितं यदि स्यादद्वैतं वस्तुवस्तुनि द्वैते । युक्तं नैव तदा स्यात् सत्येऽध्यासो भवत्यसत्यानाम् । यद्यारोपणमुभयोस्तदप्रतिरिक्तस्य कस्यचिद्भावः । आरोपणं न शून्ये तस्माद्द्वैतसत्यता ग्राह्या । प्रत्यक्षाद्यनवगतं श्रुत्या प्रतिपादनीयमद्वैतम् । द्वैतं न प्रतिपाद्यं तस्य स्वयमेव लोकसिद्धत्वादिति । प्रपञ्चो यदि विद्येत निवर्त्तेत न संशयः । मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ।"

**द्वैतवन** न० द्वे शोकमोहादिके इते यस्मात् द्वीतं स्वार्थे अण् कर्म्म० । १तपोवनभेदे "युधिष्ठिरं द्वैतवने वनेचरः" किरा० । २तादृशवनोपलक्षिते सरोवरभेदे च । "इदं द्वैतवनं नाम सरः पुण्यजलोषितम् ।" "गच्छामः पुण्यं विख्यातं महद्द्वैतवनं सरः" भा० व० २४ अ० । "तेन चैतेन ध्वसा द्वैतवन ईजे मात्स्यो राजा यत्रैतद्द्वैतवनं सरस्तदेतद्गाथयाभिगीतं चतुर्द्दश द्वैतवने राजा संग्रामजिद्धयान् इन्द्राय वृत्रघ्नेऽबध्नात् तस्माद्द्वैतवनं सरः" शत० ब्रा० १३।५।४।९ ।

**द्वैतवाद** पु० द्वैतमधिकृत्य वादः । गौतमादिप्रणीते जीवेश्वरविभेदनिर्णायके १कथारूपग्रन्थभेदे कपिलादिप्रणीते नानाजीवनिर्णायके २कथाभेदे च । तत्र सांख्यमते यथा जीवानां परस्परभेदस्तथा सां० का० तत्त्वकौ० उक्तो यथा "जन्ममरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च । पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव" सां० का०। "पुरुषबहुत्वं सिद्धं कस्माज्जन्ममरणकरणानां प्रतिनियमात् निकायविशिष्टाभिरपूर्वाभिर्देहेन्द्रियमनोऽहङ्कारबुद्धिवेदनाभिः पुरुषस्याभिसम्बन्धोजन्म न तु पुरुषस्य परिणामस्तस्यापरिणामित्वात् तेषामेव च देहादीनामुपात्तानां परित्यागो मरणं न त्वात्मनोविनाशः तस्य कूटस्थनित्यत्वात् । करणानि बुद्ध्यादीनि त्रयोदश तेषां जन्ममरणकरणानां प्रतिनियमोव्यवस्था सा खल्वियं सर्वशरीरेष्वेकस्मिन् पुरुषे नोपपद्यते तदा खल्वेकस्मिन् जायमाने सर्वे जायेरन् म्रियमाणे च म्रियेरन् अन्धादौ चैकस्मिन् सर्वे एवान्धादयः विचित्ते चैकस्मिन् सर्व एव विचित्ताः स्युरित्यव्यवस्था स्यात् प्रतिक्षेत्रं पुरुषभेदे तु भवति व्यवस्था । नचैकस्यापि पुरुषस्य देहोपाधानभेदाद्व्यवस्थेति युक्तं पाणिस्तनाद्युपाधिभेदेनापि जन्ममरणादिव्यवस्थाप्रसङ्गात् । न हि पाणौ छक्णे, जाते वा स्तनादौ महत्त्वयवे, युवतिर्जाता मृता वा भवतीति । इतश्च प्रतिक्षेत्रं पुरुषभेद इत्याह अयुगपत्प्रवृत्तेश्च प्रवृत्तिः प्रयत्नलक्षणा यद्यप्यन्तःकरणवर्त्तिनी तथापि पुरुषे उपचर्यते तथा च तस्मिन्नेकत्र शरीरे प्रयतमाने स एव सर्वशरीरेष्वेक इति सर्वत्र प्रयतेत सर्वाण्येव शरीराणि युगपच्चालयेत् नानात्वे तु नायं दोष इति । इतश्च पुरुषभेद इत्याह त्रैगुण्यविपर्ययाच्चैव एवकारोभिन्नक्रमः सिद्धमित्यस्यानन्तरं द्रष्टव्यः सिद्धमेव नासिद्धम् । त्रयोगुणास्त्रैगुण्यं तस्य विपर्ययोऽन्यथाभावः, केचित् खलु सत्त्वनिकायाः सत्त्वबहुला यथोर्द्ध्वस्रोतसः केचिद्रजोबहुलाः यथा मनुष्याः । केचित्तमोबहुलाः यथा तिर्य्यग्योनयः । सोऽयमीदृशस्त्रैगुण्यविपर्य्ययोऽन्यथाभावस्तेषु सत्त्वनिकायेषु न भवेत् यद्येकः पुरुषः स्यात्भेदे त्वयम् दोष इति" तत्त्वकौ० । "जन्मादिव्यवस्थातः पुरुषबहुत्वम्" नाद्वैत श्रुतिविरोधः जातिपरत्वात्" सां० सू० ।

**द्वैतवादिन्** त्रि० द्वैतं जीवभेदं जीवेश्वरयोर्भेदं वा वदति वद–णिनि । जीवभेदवादिनि जीवेश्वरयोर्भेदवादिनि च नैयायिकादौ ।

**द्वैताद्वैत** न० द्वैतञ्चाद्वैतञ्च । जीवेश्वरयोर्भेदाभेदयोः । "अद्वैतञ्च तथाऽद्वैतं द्वैताद्वैतं तथैव च । न द्वैतं नापि चाद्वैतमित्येतत् पारमार्थिकम् । न हि नैवान्यसम्बन्धो ब्रह्मभावेन भावितः । द्वैतच्छायामवस्थायामवाप्यं परमं पदम् । द्वैतपक्षाः समाख्याता येऽद्वैते तु व्यवस्थिताः" ।